गणपतिस्तोत्रं

नं० १३२९

5789

P. 18 — 4

P. good — 3

Total — 1 Complete

Good

ग. ॐश्रीगणेशायनमः श्रीगणेशायविघ्नेशवैभवाद्भुतके
१ तवे नमोनिर्विघ्नमारब्धकार्यनिर्वाहहेतवे १ ॐकारमा
द्यंप्रवदंतिसंतोवाचःश्रुतीनामपियंगृणंति गजाननं
देवगणानतांघ्रिंभजेहमर्धेंदुकृतावतंसं पादारविंदा
र्चनतत्पराणांसंसारदावानलभंगदक्षं निरंतरंनिर्गत
दानतोयैस्तंनौमिविघ्नेश्वरमंबुदाभं कृतांगरागंनव।
कुंकुमेनमत्तालिमालांमदपंकलग्नां निवारयंतंनिज

कर्णतालैः कोविस्मरेत्पुत्रमनंगशत्रोः शंभोर्जटाजूट
निवासिगंगाजलंसमादायकरांबुजेन लीलाभिराग।
च्छिवमर्चयंतंगजाननंभक्तियुताभजंति कुमारमुक्तो
पुनरात्महेतोः पयोधरौपर्वतराजपुत्र्याःप्रक्षालयंतं
करशीकरेणमुग्धाननंनागमुखंभजामि त्वपाशमुद्
त्यगजास्यहस्तंपो।णीकराः सफुरंप्रमुक्ताः व्योमांगनेते
विचरंतितारा:कालात्मनोमौक्तिकतुल्यभासः क्रीडारते।

ग॰ देवकुमारमुख्यैः त्वयिक्षणं कालगतिं विहा[illegible]तैश्चाप
२ त्तः कंदुकतामिनेंदू मदोल्लसंतं च सुरैरजस्त्रमध्याप
2 यितं सकलागमर्थान् देवान् ऋषीन् भक्तिजनैकमित्रं हे
रंबमकोहणमाश्रयामि पादांबुजाभ्यामतिवामनाभ्यां ।
कृतार्थयंतं कृपयाधरित्रीं अकारणं कारणमाप्तवाचं तं
नागवक्त्रं नजहातिचेतः येनार्पितं सत्यवतीसुताय पुरा
णमालिख्यविषाणकोट्या तं चंद्रमौलेस्तनयं तपोभिर

वाप्यमानंदघनंभजामि पदंश्रुतीनामपदंस्तुतीनांलीला
वतारंपरमष्टमूर्तेः नागात्मकोवापुरुषात्मकोवेत्यभेद्य
माद्यंभजविघ्नराजं पाशांकुशौभग्नरदंत्वभीष्टंकरैर्दधा
नेकररंध्रमुक्तैः मुक्ताफलाभैःपृथुशीकरौघैःसिंचंतमं
ङ्गिशिवयोर्भजामि अनेकमेकंगजमेकदंतंचैतन्यरूपं
जगदादिवीजं ब्रह्मेतियंवेदविदोवदंति तंशंभुसूनुंशर
णंव्रजामि स्वांकस्थितायानिजवल्लभायामुखांवुजालोक

ग. नलोलनेत्रं स्मेराननाब्जं मदवैभवेन मइंभजे विघ्नविमो
२ हनं तं येपूर्वमाराध्य गजाननं त्वां सर्वाणि शास्त्राणि पठं
ति तेषां त्वत्तो न चान्यत्प्रतिपाद्यमेतैस्तदस्ति तत्सत्यम
सत्यकल्पं हिरण्यगर्भं जगदीशितारं कविं पुराणं रवि
मंडलस्थं गजाननं यन्म हसाजनानां विघ्नांधकारं विल
यं प्रयाति शंभोः समालोक्य जटाकलापे शशांकखंडं
निज पुष्करेण स्वभग्नदंतं प्रविचिन्त्य मौग्ध्यादाक्रष्टुका

मः शिवमातनोतु विघ्नार्गलानांविनिपातनार्थंयन्नारि
केलैः कदलीफलाभैः प्रवादयंतंमदवारणास्यंप्रायुर्नरो
भीष्टमहंभजेतं यस्तैरनेकैर्बहुभिस्तपोभिराराध्यमाद्यं
गजराजवक्त्रं स्तुत्यानयायेविधिनास्तुवंति तेसर्वलक्ष्मी
निधयोभवंति ॥ इतिश्रीशारदातिलकेतंत्रे श्रीम
हागणपतिस्तोत्रं संपूर्णम् श्रीरस्तु ॥

ग· ४

५

नं० ८८०

ॐश्रीगुरुभ्योनमः ॐस्वस्तिश्रीगणेशायनमः। श्री
रस्तु॥ ॐअथश्रीआरतीस्तोत्रम् ॐजयजयहरविरुजं
२ नीराजनमुररीकुरु २ सफलंकुरुमज्जाम् जय
देविजयदेवि १ जयमातःषोडशि जयसुंदरिबाले २
जयकामेशविलासिनि त्रिपुरेश्वरिहाले जयदेवि२॥
२॥ जयप्रणामेसत्त्वकारिणि भवतारिणितारे २
जयभगवतिभुवनेश्वरि जयमातंगगिरि जयदेवि॥ ३॥

नं० १३२८

श्रीः

१

जयभैरविबगले जयजयछिन्नशिरे २ जयकमले
धूमावति जयजय ॐकारि जयदेवि २॥ ४ जय
पद्मेजयरविजेजयजयजयगिरिजे २ जयहरिवि
धिहरधारिणि २ परमेश्वरि विरजे जयदेवि २ ५
जयषट्चक्रनिवासिनि कुंडलिनी रूपे २॥ जयप
रब्रह्मविहारिणि २ व्यापिनि चिद्रूपे जयदेवि २॥
६ जयजयवाग्भवरूपिणि जयत्रिगुणातीते २

जयविद्येऽमृतदायिनी २ सकलागमगीतेजयदे
वि २ ३ भवभयपीडितभावुकपरिपालनसद
ये २ जयसुरनवरदायिनि २ करुणामयहृदये
जयदेवि २ ५ नवरविकिरणारुणवपुःशालिनि
त्रिनयने २ पाशांकुशशरचापिनि २ धारिणि
विधुवदने जयदेवि २ ६ मणिमयमंदिरमंडि
त नतुविजितानंगे २ दिव्यांबरवरभूषणे २ भूषि

श्रीः नसर्वांगे जयदेवि २ ९ जयपदकमलोपासककौ
लिकजनमुखदे २ मंत्राराधनतत्पर २ वरवांछि
तफलदे जयदेवि २ ११ जयगुरुवीरवधूविधिकृ
तपूजनमुदिते २ आलयपीतमहासव २ परबो
२ धात्रुमिते जयदेवि २ १२ जानेनवपदशरणं
भयहरणंगुरुरम्य २ वितरयमयिविज्ञाने २
मा मोहयरम्ये जयदेवि २ १३ केजानेतिजनास्त

वरमहिमामनघे २ मनुमर्चनमनुयुगगण २
वर्णनमपिसुभगे जयदेवि २ १४ कर्पूरादिसु
वासितदीपावलिरमला २ विलसितनवसिंहास
न २ वरनिकटेधवला जयदेवि २ १५ स्तवन
मकिंचिकरनवविधिरचितं २ भवतुहितायतवे
दं २ मधुरानवविचितं २ जयदेवि २ १६ पठति
नरोयदिभक्त्या नवपूजनसदने २ सभवतिहितं

श्रीः

उराशय २ मुक्तःशशिवदने जयदेवि २ १७ योगा
यत्पतिहर्षात् ऊलहृदयसमये २ सभवतिब्र
ह्मणिलीनः २ परमानंदमये जयदेवि २ १८
जयजयहतविरुजो जयजयहतविरुजो नीराज
नमुररीकुरु नीराजनमुररीकुरु सफलीकु
रुपूजाम् १९ जयदेवि २ इतिश्रीमहामाहेश्वर
चक्रवर्तिसाम्राज्यवरश्रीसांबकौलविरचिताश्री ५
रि

3

१

देवीआरतीस्तुतिः संपूर्णा